International Journal of Sanskrit Research 2022; 8(4): 112-115

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(4): 112-115
© 2022 IJSR
www.anantaajournal.com
Received: 13-05-2022
Accepted: 17-06-2022

**वीरेन्द्रः दासः**
सहायकाध्यापकः,
संस्कृतविभागः, कृष्णचन्द्रः,
महाविद्यालयः, वीरभूमः,
पश्चिमवङ्गः, भारत

**Corresponding Author:**
**वीरेन्द्रः दासः**
सहायकाध्यापकः,
संस्कृतविभागः, कृष्णचन्द्रः,
महाविद्यालयः, वीरभूमः,
पश्चिमवङ्गः, भारत

# भविष्यपुराणानुसारं मुघलवंशस्य ऐतिहासिकसमीक्षणम्

**वीरेन्द्रः दासः**

## सारांश
पुराणपञ्चलक्षणेषु वंशानुचरितम् अन्यतमम्। वंशवर्णनाप्रसङ्गे पुराणेषु वहुनां राजवंशानामालोचना प्राप्यते। भविष्यपुराणे अपि तस्य व्यतिक्रमः नास्ति। अस्मिन् महापुराणे सत्यादि चतुर्युगानां राज्ञां वर्णना अस्ति।विशेषतः मध्ययुगीयराज्ञां वर्णना परिलक्ष्यते। मध्ययुगीयराजवंशानां मध्ये मुघलराजवंशोऽन्यतमः।वावर-आकवरादिराज्ञां राज्यशासनविषयकालोचना सम्पर्कितालोचना भविष्यपुराणस्य प्रतिसर्गपर्वणः चतुर्थभागस्य द्वाविंशतितमे अध्याये प्राप्यते। भारतवर्षनिर्माने तथा राष्ट्रगठने तेषां राज्ञां अवदानमासीत् न वा एतस्मिन् विषये मम आलोचना समीक्षा च विद्यते। अस्मिन् निवन्धे मुघलवंशस्य राज्ञां चरित्रं वर्णितम्, तेषां राजत्वकालः उल्लिखितः तेषां पुत्राणां नामानि उल्लिखितानि, नादिरशाहस्य कार्यं वर्णितम्, राजारूपेण शिवाजीणः वीरत्वं आलोचितम्।अस्मिन् गवेषणाप्रवन्धे मुघलवंशस्य राज्यशासनव्यवस्थालोचनेन सह तत्कालिकसमाजचित्रस्यापि यथायथवर्णना क्रियते।

**कूटशब्दाः** इतिहासः, पुराणम्, वावरः, हुमायुनः, आकवरः, ओरङ्गजेवः, शिवाजी

## प्रस्तावना
'इतिहासपुराणाभ्यां वेदं समुपवृंहयेत्' इति बिद्वत्वचनानुसारं वेदोपवृंहनशास्त्रं पुराणशास्त्रं तथा इतिहासशास्त्रम्। उभयोशास्त्रयोर्मध्ये भिन्नत्वमस्ति तथापि आलोचनागतसादृश्यमपि परिलक्ष्यते। इतिहासशास्त्रं प्राचीनविषयमवलम्ब्य विरचितम्, पुराणमपि तथैव। किन्तु पुराणशास्त्रे वहुविधविषयसन्निवेशात् इतिहासशास्त्रात् तस्य अतिशयमहनीयत्वम् सर्वे स्वीकुर्वन्ति। अतः पुराणशास्त्ररचनाकाले यथा साहित्य-दर्शन-अलंकार-धर्म-सामाजिक-प्रभृतीनां विषयानां सन्निवेशः परिलक्ष्यते तथैव ऐतिहासिकतथ्यानामपि परिवेशनम् वहुषु पुराणेषु गृहीतमस्ति पुराणकारेण।

भविष्यपुराणशास्त्रमपि ऐतिहासिकतथ्यसम्बलितम्। भविष्यपुराणे ऐतिहासिकविषयानामुपस्थापनस्य कोऽभिप्रायः पुराणकारस्य इति प्रश्नः जायते। ऐतिहासिकतत्त्वानुसन्धित्सुनां कृते ऐतिहासिकशास्त्रस्य वाहुल्यमस्ति। अतः किमर्थं भविष्यपुराणकारः अस्मिन् महती शास्त्रे ऐतिहासिकतत्त्वानां व्याख्यानं क्रियते? अस्मिन् विषये आलोचनायाः प्राक् इतिहासस्य किं तावद् स्वरूपम् इत्यपि अवज्ञेयम्।

इतिहासः पुराणं च द्वयं पृथक् शास्त्रम्। तथापि आलोचनायाः सापेक्षत्वात् पुराणसाहित्यस्य वृहत्कलेवरे विविध-ऐतिहासिक-उपादानस्य वीजं विविधरूपेण विविधउद्देश्ये प्रोथितम्।न केवलं साहित्यरसस्य परिवेशनम् पुराणस्य उद्देश्यमपि च भारतवर्षस्य चिरन्तनचिन्ताधारारूपा तथा सनातनचिन्ताधारारूपा प्राचीनपरम्परा यद् इतिहासः इति आख्यायां परिचितःतद् पुराणालोचनायाः कलेवरं अतिशयितं क्रियते। इतिहास-पुराणयोर्मध्ये पार्थक्यं क्रियन्ते वहवः पुराणज्ञाः। कदापि ते उभयशास्त्रस्य रचनागतं सादृश्यं स्वीक्रियते वहुलांशे। अतः भविष्यमहापुराणम् ऐतिहासिकविविधतथ्यानां आकरग्रन्थः। अधुना प्रश्नः जायते ऐतिहासिकतथ्यं किम् तदुत्तरे कथ्यते- मनुष्याणां आदिमावस्थातः विविधविवर्तनस्य संग्रामस्य च सुदीर्घइतिवृत्तं सभ्यतायाः क्रमोन्नतेः धारा, अतीतस्य वहवः अज्ञातविषयाः येन शास्त्रेण अस्माकं वोधगम्यं भवति तद् शास्त्रं इतिहासः इति नाम्नाभिहितः। ऐतिहासिक-उपादानस्य अन्यतमालोच्यविषयः वंशवर्णना। विभिन्नेषु पुराणेषु वंशवर्णना पुराणपञ्चलक्षणेषु अन्यतमाङ्गरूपेण अधिकं गुरुत्वं प्राप्यते। भविष्यमहापुराणमपि अस्य विषयस्य अन्यथात्वं नासीत्। समग्रे भविष्यपुराणशास्त्रे ऐतिहासिक-उपादानरूपेण राजवंशानां नामानि, वंशानां क्रमविकाशः,साम्राज्यस्य विस्तारः ,साम्राज्यस्य परिधिः, राज्ञां राजत्वकालः प्रभृतीनां विषयानामालोचना प्राप्यते। कालिकपरम्परया तद्सर्वं आलोच्यते। एस.एन.खण्डेलवालानुदितं चौखम्वासंस्कृतप्रतिष्ठानतः प्रकाशितं श्रीभविष्यमहापुराणस्य प्रथमसंस्करणमाधारीकृत्य अस्य गवेषणाप्रवन्धस्य आलोचनम्।

भविष्यपुराणस्य प्रतिसर्गपर्वणः चतुर्थभागस्य द्वाविंशतितमे अध्याये वावरादिराज्ञां तथा मुघलवंशस्य राज्ञामालोचना परिदृश्यते। दैत्यकार्यकारीराज्ञां वर्णनाप्रसङ्गे मुघलवंशस्य राज्ञां नामानि प्राप्यन्ते। दैत्यकार्यकारी इत्युक्ते धर्मविरोधीकार्यकारी तथा वेदविरोधीकार्यकारीराज्ञां वोध्यते। वैष्णवगणैः मेरुदेशस्य मुर्द्धास्थले अर्थात् वङ्गदेशस्य नदीयाजेलायाः शान्तिपुरे अथवा उत्कलराज्यस्य पुरीधामे यज्ञकार्यां वर्धन्ते स्म। यज्ञकार्यं वर्धते इयम् वार्ता श्रुत्वा दैत्यराजवलिः रोषणदैत्यं देहलीं नगरं प्रवेष्टुं दैत्यकार्यं कर्तुं च आदिदेशः। तिमिरलिंगस्य पुत्रेण सरुषेण सह इति नाम्ना दैत्यराजरोषणः देहल्याम् प्रविश्य वेदादिज्ञानयुक्तानां तथा वेदमार्गानुसारीजनानां उपरि आक्रमणं कृत्वा तेषां नाशं कर्तुमारभते स्म। भविष्यपुराणे उक्तम्-

ननाश वेदमार्गस्थान्देहलीदेशमास्थितः।[1]
एवंरूपेण रोषणदैत्यः पञ्चवर्षपर्यन्तं राजत्वं कृतवान्।
पञ्चवर्षं कृतं राज्यं तत्सुतो वावरोऽभवत्।[2]

अतः रोषणस्य पुत्रः वावरस्य जन्मोऽभवत्। राजा वावरः विंशतिवर्षप्रर्यन्तं राजत्वं कृतम्। धूर्तम्लेच्छवावरेण शङ्कराचार्यगोत्रभुक्तः ब्रह्मचारीमुकुन्दः मृतोऽभवत्। तेन देवतायाः प्रतिमाः नष्टभ्रष्टः क्रियते। एतादृशं दृश्यं दृष्ट्वा मुकुन्दः अग्नौ आत्मवलिदानं दीयते। तस्य विंशति शिष्याः अपि प्राणविसर्जनं कृतवन्तः।अतः वावरस्य एकस्य पुत्रस्य जन्मोऽभवत् तस्य नाम हुमायुः। सः सर्वदा मद्यपानं कृत्वा दुर्व्यवहारं करोति। सः साधुजनान् प्रति दुर्व्यवहारः कृतः। एतादृशावस्थायाम् सर्वे भक्तजनाः नदीयायाम् स्थितस्य कृष्णचैतन्यमहामानवस्य स्तुतिं क्रियन्ते स्म। तेषां स्तुतिं श्रुत्वा भगवान् हरिः क्रुद्धः जातः। सः विष्णुदेवः स्वतेजसा होमायुराज्यस्य विनाशं कृतवान्। अस्मिन् काले सर्वे जनता तथा सर्वे सैन्यगणः राजानं होमायुं पराजित्य तं विताडितं कृतः।तस्मात् परं माराठाराजगणेन सह शेषशाकः तथा शेरशाहः देहलीमधिकारं कृतवान्।
महाराष्ट्रैस्तदा तत्र शेषशाकः समास्थितः।[3]
शेरशाहः तत्र पञ्चवर्षप्रर्यन्तं राजत्वं कृत्वा धर्मकार्यं वर्द्धयति।
धर्मकार्यं कृतं तेन तद्राज्यं पञ्चहायनम्।[4]
विताडणात् परं यदा होमायुः काश्मीरे निवसति तदा तस्मिन् स्थाने तस्य एकस्य पुत्रस्य जन्मोऽभवत्।तस्मिन् काले आकाशवाणी भवति- अकस्मात् एकवरप्रभावेन तस्य पुत्रस्य जन्मो भविष्यति। एतस्मात् कारणात् तस्य नाम भवति अकवरः तथा आकवरः इति। सः अतीव प्रभावशाली तथा प्रतापशाली भविष्यति। भविष्यपुराणकारस्य भाषायाम्-

अकस्माच्च वरो जातः पुत्रोऽयं सर्वभाग्यवान्
पैशाचे दारुणे मार्गे न भूतो न भविष्यति
अतः सोऽकवरो नाम होमायुस्तनयस्तव।।[5]

---

[1] भविष्यमहापुराणम्, प्रतिसर्गपर्व 4. 22. 3

[2] भविष्यमहापुराणम्, प्रतिसर्गपर्व 4. 22. 4

[3] भविष्यमहापुराणम्, प्रतिसर्गपर्व 4. 22. 7

[4] भविष्यमहापुराणम्, प्रतिसर्गपर्व 4. 22. 8

[5] भविष्यमहापुराणम्, प्रतिसर्गपर्व 4. 22. 13-14

अस्मात् श्लोकात् ज्ञायते आकवरः म्लेच्छः सदपि सः पिशाचमार्गानुसारी न आसीत्।

सः हुमायुनस्य सुपुत्ररूपेण परिचितोऽभवत्। हुमायुनः अपि भविष्यवाणीं श्रुत्वा क्षुधापीडितानां कृते दानं कृतवान्। सः सुलक्षणयुक्तं पुत्रं लव्ध्वा अतिशयमानन्दं अनुभवति स्म। राजा हुमायुनः सप्रेम्णा पुत्रं पालयति स्म।आकवरः दशवर्षपर्यन्तं काश्मीरे स्थित्वा देहलीनगर्यां आगतवान्। तस्मिन् काले देहलीनगर्यां शेषशाकः तथा शेरशाहः राज्यशासनमकरोत्। वीरत्वयुक्तराजपुत्रः आकवरः शेरशाहं पराजित्य देहलीनगरीं लव्धवान्। किन्तु तदा देहलीनगर्यां राजा हुमायुनः राज्यशासनं कूर्वण आसीत्। अतः परं आकवरः राज्यशासनकर्तुं आरभते स्म।भविष्यपुराणे उक्तम्-

शेषशाङ्कं पराजित्य स च राजा वभूव ह
अव्दं तेन कृतं राज्यं तत्पुत्रश्च नृपोऽभवत्।।[6]

सिंहासनासीनं भूत्वा आकवरः निर्विघ्नेन राजत्वं कृतवान्। सः सलोमा नाम एकं पुत्रं लव्धवान्। वर्तमाने इतिहासे सलोमा सेलिम वा जाहाङ्गीरः वा इति नाम्ना ख्यातः। आकवरस्य परं सलोमा राज्यलाभं कृतवान्। सः पितुः समकालपर्यन्तं राजत्वं कृतम्। सेलिमस्य वा जाहाङ्गीरस्य पुत्रः आसीत् खुर्दकः खुरम् वा। खुर्दकस्य अपरः नाम शाहजाहानः । सः दशवर्षपर्यन्तं राजत्वं कृतवान्। खुर्दकस्य तथा शाहजाहानस्य चत्वारः पुत्राः आसन्। मध्यमपुत्रस्य नाम आसीत् नवरङ्गो तथा ओरङ्गजेवः वा। अपरपुत्राणां नामविषये उल्लेखः न प्राप्यते अस्मिन् पुराणे। खुर्दकप्रसङ्गे उच्यते-

खुर्दकस्तनयस्तस्य दशाव्दं च कृतं पदम्
चत्वारस्तनयास्तस्य नवरङ्गो हि मध्यमः।।[7]

नवरङ्गस्य तथा ओरङ्गजेवस्य राजत्वकाले देवीपक्षस्य ब्राह्मणवंशस्य सुदक्षः राजा आसीत् शिवाजी। सः ओरङ्गजेवं वधं कृत्वा ओरङ्गजेवस्य पुत्रं आलोमां राजपदे अभिसिक्तवान्।आलोमा पञ्चवर्षपर्यन्तं राजत्वं कृत्वा परलोकं गतवान्। अतः तालनवंशस्य राजा फलरुषः मुघलवंशस्य ध्वंसं कृत्वा आधिपत्यस्थापनं कृतवान्। सः दशवर्षपर्यन्तं राजत्वं कृतवान्। फलरुषस्य मृत्योः परं तस्य पुत्रः महामदः विंशतिवर्षपर्यन्तं राजत्वं कृत्वा आलोमणः समग्रराज्यं स्वाधिकारे आनीतवान्। अस्मिन् राज्यकाले नादरः तथा नादिरशाहः भारतवर्षं प्रविश्य वहुनामार्यानां हत्वा सम्पदाः च गृहीत्वा सः खुरजदेशे तथा इराणे प्रत्यागतः।

तद्राष्ट्रे नादरो नाम दैत्यो देशे उपागमत्
हत्वार्यांश्च सुराञ्जित्वा देशं खुरजमाययौ।।[8]

महामदस्य पुत्रः आसीत् महामत्स्यः।सोऽपि पञ्चवर्षपर्यन्तं राजत्वं कृतवान् महाराष्ट्रीयराज्ञा शिवाजीद्वारा महामत्स्य पराजितः मृतश्च।अतः माधवः देहल्याः सिंहासने उपविष्टः। दशवर्षपर्यन्तं राजत्वं कृतवान्।स्वशक्त्या च राज्ञः आलोमाशासितस्य राज्यस्य आधिपत्यं स्थापितवान्। माधवस्य राज्ये वहवः आर्यदेशजाः नृपाः आसन्।

इतिहासरचनायाः क्षेत्रे साहित्यिकोपादानानां मध्ये पुराणं अन्यतमम्।किन्तु इतिहासग्रन्थानां पुराणग्रन्थानां च उभयोर्मध्ये केषुचित् भागेषु सादृश्यं वैसादृश्यमपि लक्ष्येते।आलोच्ये भविष्यपुराणे अपि राजवंशानां वर्णनाप्रसङ्गे किञ्चित् सादृश्यं किञ्चित् वैसादृश्यं च परिलक्ष्यते। इतिहासे प्रकीर्तितानां राज्ञां नामभिः सह अस्मिन् पुराणे उल्लिखितस्य मुघलवंशस्य राज्ञां नाम्नां किञ्चित् पार्थक्यं परिलक्ष्यते। यथा-

| इतिहासे | भविष्यपुराणे |
|---|---|
| तैमुरलङ्गः | तिमिरलङ्गः |
| हुमायुनः | हुमायुः |
| आकवरः | अकवरः |
| सेलिमः | सलोमा |
| ओरङ्गजेवः | नवरङ्गः |
| नादिरशाहः | नादरः |
| शेरशाहः | शेषशाकः |

अस्मिन् भविष्यपुराणे स्पष्टतया धारावाहिकतया एतेषां राज्ञां वंशवर्णना न प्राप्यते। अत्र मुघलवंशस्य सुविस्तृतालोचना न प्राप्यते। अस्मिन् पुराणे मध्ययुगीयमुघलवंशस्य राज्ञां नामानि पुत्राणां नामानि च प्राप्यन्ते। किन्तु तेषां राजत्वकालं सम्यकतया न प्राप्यते।अतः भविष्यपुराणे मुघलवंशस्य राज्ञां राजत्वकालविषये संशयः जायते।राज्ञां चरित्रविषये सामान्यतया उल्लेखः दृश्यते।अस्मात् पुराणात् ज्ञायते यत् वावरादिराज्ञां मध्ये वावरः हुमायुनश्च

[6] भविष्यमहापुराणम्, प्रतिसर्गपर्व 4. 22. 19

[7] भविष्यमहापुराणम्, प्रतिसर्गपर्व 4. 22. 45-46

[8] भविष्यमहापुराणम्, प्रतिसर्गपर्व 4. 22. 58

धर्मविरोधीमनोभावापन्नौ आस्ताम्।अपरपक्षे आकवरः धर्मप्रियः राजा आसीत्।

भविष्यपुराणानुसारं मुघलवंशस्य राज्ञां वंशतालिका-

रोषणदैत्यः
↓
वावरः
↓
हुमायुः
↓
अकवरः
↓
सलोमा
↓
खुर्दकः
↓
नवरङ्गः(मध्यमपुत्रः)
↓
आलोमा

**ग्रन्थपञ्जी**


1. भविष्यपुराणम् 1म-2य खण्ड) श्रीमत् स्वामी परमात्मानन्दनाथ भैरव (गिरि) सम्पादकः, नवभारत पावलिशार्स, कलकाता- 1420
2. श्रीभविष्यमहापुराणम् 1म-2य-3य, भाग एस. एन खण्डेलवाल,व्यख्याकारः, चौखम्वा, संस्कृत प्रतिष्ठान, दिल्ली, 2017
3. आप्टे वामन शिवराम, संस्कृत हिन्दी कोश, मोतीलाल वनारसीदास पाव्लिशार्स प्राइभेट लिमिटेड, दिल्ली 1969
4. त्रिपाठी, श्रीकृष्णमणि, पुराणपर्यालोचनम् (भागद्वयम्)चौखम्वा सुरभारती प्रकाशन वाराणसी, 2012
5. वन्द्योपाध्यायकक, धीरेन्द्रनाथ, संस्कृत साहित्येर इतिहास, पश्चिमवङ्ग राज्यपुस्तक पर्षत्, कलकाता 2009
6. राय, अनिरुद्धः, मुघल साम्राज्येर उत्थान-पतनेर इतिहास, प्रथम खण्ड द्वितीय खण्ड, प्रगतिशीलः प्रकाशकः, कलकाता, 2020
7. पण्डा, गङ्गाधर, संस्कृत वाङ्मय का वृहत् इतिहास, उत्तरप्रदेश संस्कृत संस्थान, लखनउ, 2006
8. उपाध्याय, आचार्य वलदेव, पुराण-विमर्श, चौखम्बा विद्याभवन, वाराणसी, 2018